षष्ठः पाठः

# किं तर्तुं जानाति भवान्

**(तुमुन्-क्त-प्रत्ययौ विधिलिङ्लकारश्च)**

विश्वविद्यालयस्य कश्चित् प्राध्यापकः विहर्तुं नावम् आरूढः। नावा जलविहारं कर्तुं तस्य प्रथमोऽयमवसरः आसीत्। बालसूर्यस्य किरणानां जलक्रीडाम्, वीचीनां नर्तनम्, अम्भसाम् अपारराशिम्, अरित्रमाध्यमेन नौकायाः अग्रेसारणम् इत्यादि दृश्यं दृष्ट्वा सः नाविकम् एवम् अपृच्छत्-



**प्राध्यापकः** - भो नाविक ! किं भवता कदापि गणितं पठितम् ?

**नाविकः** - न पठितम्।

**प्राध्यापकः** - किं गणितं पठितुं विद्यालयं न गतवान्।

**नूनं भवतः** जीवनस्य चतुर्थांशः व्यर्थतां गतः। भवता

**रसायनशास्त्रं** भौतिकशास्त्रं वा पठितं स्यात्।

**नाविकः** - ईदृशं मे भाग्यं कुतः ? यदहं भौतिक-

**शास्त्रं** रसायनशास्त्रं वा पठेयम्।



**प्राध्यापकः** - नूनं त्वया अर्धांशः जीवनस्य व्यर्थतां नीतः। वद वद त्वया आंग्लभाषा तु पठिता स्यादेव?

**नाविकः** - (ग्लानिम् अनुभवन्) महाशय! नाहं मात्रा पित्रा वा विद्यालयं प्रेषितः। कुतः पठेयम्?

**प्राध्यापकः** - तर्हि तव जीवनस्य त्रयो भागाःअपार्था जाताः। अत्रान्तरे नदे जलावर्तनं समायातम्। लहरीणां वेगेन तदा नौः अकम्पत। पश्यतोः एव तयोःनौका जलेन पूरिता जाता। नाविकः प्राध्यापकं सम्भ्रमेण अपृच्छत् - महाशय! किं भवान् तर्तुं जानाति? प्राध्यापकः नौकां जलपूरितां दृष्ट्वा भीतोऽवदत् - अहं तर्तुं न जानामि। नाविकः अवोचत्- यदि तर्तुं न जानाति, तदा भवतः सर्वं जीवनं वृथा जातम्। अहं तु बाहुभ्यां नदं तीर्त्वा पारं प्रयामि। किन्तु यदि भवान् अन्यथा न मन्यते, अहं भवन्तं स्वपृष्ठमारोप्य पारगन्तुमिच्छामि।

## शब्दार्थः

**विहर्तुम्** = घूमने के लिए। **नावम्** = नाव पर। **आरूढः** = बैठ गया। **जलविहारम्** = जलविहार। **वीचीनाम्**= तरङ्गों का। **अम्भसाम्** = जल की। **अरित्रम्** = पतवार, डाँड़। **चतुर्थांशः** = चैथाई भाग। **व्यर्थतां गतः** = व्यर्थ चला गया। **ईदृशम्** = ऐसा। **मे** = मेरा। **कुतः** = कहाँ से। **नूनम्** = निश्चय ही।**अर्धांशः** = आधा हिस्सा। **व्यर्थतां नीतः** = व्यर्थ कर दिया। **अनुभवन्** = अनुभव करता हुआ।**प्रेषितः** = भेजा गया। **त्रयो भागाः** = तीन भाग। **अपार्थाः** = व्यर्थ। **नदे** = नदी में। **जलावर्तनम्** = भँवर। **अकम्पत** = डगमगाने लगा। **पश्यतः** = देखते-देखते। **जलेन** = जल से। **पूरिता** = भर गयी।**सम्भ्रमेण** = घबराहट के साथ। **तर्तुम्** =

तैरने के लिए। **भीतः** = डरा हुआ। **तीर्त्वा** = तैरकर।**प्रयामि** = जाता हूँ। **खलु** = निश्चय ही।
**विहरतु** = विहार करें। **स्वपृष्ठमारोप्य** = अपनी पीठ की सहायता से।

अभ्यासः

**1. उच्चारणं कुरुत पुस्तिकायां च लिखत-**

आरूढः जलावर्तनम् चतुर्थांशः

व्यर्थताम् तीर्त्वा अरित्रमाध्यमेन

**2. एकपदेन उत्तरत -**

(क) कः विहर्तुं नावम् आरूढः ?

(ख) नौकायाः अग्रेसारणं केन माध्यमेन भवति ?

(ग) कः ग्लानिम् अन्वभवत् ?

(घ) जलेन पूरिता का जाता ?

**3. कः कथयति इति लिखत - नाविकः / प्राध्यापकः**

(क) भवता कदापि गणितं पठितम् ? (ख) ईदृशं मे भाग्यं कुतः ?

(ग) त्वया अर्धांशः जीवनस्य व्यर्थतां नीतः।

(घ) अहं तर्तुं न जानामि।

(ङ) यदि तर्तं ु न जानाति, तदा भवतः सर्वं जीवनं वृथा जातम्।

**4. अधोलिखितधातुभिः तुमुन्-प्रत्ययं योजयित्वा पदरचनां कुरुत -**

यथा-खाद् +तुमुन् = खादितुम्।

चल् + तुमुन् =...........................

हस् + तुमुन् =...........................

क्रीड् + तुमुन्=...........................

पठ् + तुमुन् =...........................

**5. अधोलिखितधातुभिः 'त्वा' (क्त्वा) प्रत्ययं योजयित्वा पदरचनां कुरुत -**

यथा- पठ् + त्वा = पठित्वा।

नी + त्वा =...........................

गम् + त्वा =...........................

लिख् + त्वा =...........................

**6. हिन्दीभाषायाम् अनुवादं कुरुत -**

(क) किं त्वया संस्कृत-भाषा पठिता ?

(ख) जीवनस्य त्रयो भागाः अपार्थाः।

(ग) प्राध्यापकः नावम् आरूढः।

(घ) भवान् खलु जलमध्ये विहरतु।

**7. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) वह पढ़ने के लिए आता है।

(ख) क्या तुम सब तैरना जानते हो ?

(ग) क्या तुम प्रतिदिन खेलते हो ?

(घ) हम दोनों घूमने के लिए नदी के किनारे जाते हैं।

**शिक्षण-सङ्केतः**

*1. पाठस्य कथानकं छात्रैः लघुसमूहेषु समयं निश्चितं कृत्वा लेखयत।*

*2. कर्मवाच्ये कर्मणः लिङ्गानुसारं कृदन्त-क्रियापदानां लिङ्गस्य परिवर्तनं बोधयत।*

**स्मरणीयम्-**

गच्छति शकटे मा आरोहेः।

चलतः शकटात् मा अवरोहेः।

दुष्टैः पुरुषैः सह मा गच्छेः।

कृत्वा कर्म झटिति आगच्छेः।

**सहसा विदधीत न क्रियाम्।**